शास्त्री - III साहित्य -

मेघदूतम्

सूक्तिव्याख्याभागः

Date __/__/__

प्र० (1) - आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥

उत्तरम् - प्रसंगः - व्याख्या - इयं सूक्तिः महाकवि कालिदास प्रणीतस्य मेघदूतस्य खण्डकाव्यस्य पूर्वमेघस्यास्ति । यक्षः मेघं प्रति कथयति यत् हिमालये देवदारुशाखासंघर्षणेन दावाग्निः प्रवृद्धो भवेच्चेत् भीषणजलधारासम्पातेन सः दावाग्नि त्वया शमनीयः । यतोहि महतां परोपकार एव कर्तव्यत्वेन विनिर्दिष्टः महर्षिभिः । एतदेव द्रढ़यनाह - हे मेघ ! पृथिव्या मानदण्ड इव देवतात्मा हिमालयो विराजते ।

यद्येवंविधं हिमालयं दावाग्निः निदग्धुः यतेत चेत् जलधाराभिः शमयितुमर्हसि । हि = यतः उत्तमानां = महतां, सम्पदः = श्रियः, आपन्नार्तिप्रशमनफलाः = आर्तपीडानिवारणप्रयोजनाः भवन्तीति शेषः । अतः हिमालयदावाग्निः त्वया निर्वापणीयः । अत्र यक्षप्रियहृदये दावानल इव विरहानल संदेशदानेन जलवर्षणेनेव प्रशमनीय इति गूढार्थोऽपि व्यज्यते ।

Renu Devi

09/08/20

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।

उपशास्त्री - II साहित्य - तृतीय - पत्रम
रघुवंश महाकाव्यम् - द्वितीयः सर्गः

Date ___ /___ /______

प्रश्न ।) पद्यमिदम् व्याख्येयम् ।
तदीयमाक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
प्रस्तुत श्लोके सिंहाक्रमणेन कातरा नन्दिनी यदा तारस्वरेण आक्रन्दितवती, तदा तदाक्रन्दितं गुहायां प्रतिध्वनितं सत् आर्तत्रातुर्दयालो राज्ञो दिलीपस्य पर्वतशोभावलोकनव्यापृता दृष्टिं दाम्ना बद्ध्वेव ततो निवर्तयामास ।

व्याख्या :— गुहानिबद्धप्रतिशब्ददीर्घं = कन्दराव्याप्तप्रतिध्वनिदीर्घम्, तदीयं = धेनुसम्बन्धी, आक्रन्दितम् = आर्तस्वरः, आर्तसाधोः = विपन्नोपकारिणः, नृपस्य = राज्ञो दिलीपस्य, नगेन्द्रसक्तां = हिमालयशोभावलोकनासक्ताम्, दृष्टिं = लोचनयुगलम्, रश्मिषु = प्रग्रहेषु, आदाय = गृहीत्वा, रज्जौ बद्ध्वा एव, निवर्तयामास = आचकर्ष ।

Renu Devi
09/08/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

Page No. ____

शास्त्री-I साहित्य

अभिज्ञानशाकुन्तलम्

Date ___/___/______

प्र०(1) अभिज्ञान शाकुन्तलस्य भरत वाक्यं लिखत ?

उत्तरम् – प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहतां महीयताम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥

प्र०(2) – भरत वाक्येन किं वाञ्छति कविः ?

उत्तरम् – समस्ताः पृथ्वीपतयः स्वसुखनिरपेक्षाः सन्तः प्रजानामेव श्रेयसे सर्वदा प्रवर्तन्ताम्, महाकवीनां सरस्वाः कविताश्च सहृदयानां हृदयेषु चमत्कारं जनयित्वा विशिष्टसम्मानं लभन्ताम्, सर्वशक्तिशाली पार्वतीपतिः परमेश्वरश्च जन्मान्तरं निरस्य शाश्वतं पदं दिशत्विति शम् ।

Renu Devi
09/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

उपशास्त्री-I साहित्य तृतीय-पत्रम्

रघुवंश महाकाव्यम्-
द्वितीयः- सर्गः

प्र०(1) पद्यमिदम् व्याख्येयम् ।

शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने ।।

उत्तरम्:- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके धर्मात्मनो राज्ञो दिलीपस्य तस्मिन् वने प्रवेशमात्रेण वृष्टिं विनापि वनाग्निः शान्तो जातः, फलेषु पुष्पेषु च वैशिष्ट्यम् अभवत् किञ्च 'जीवो जीवस्य भक्षणम्' इत्यनुसारं वन्यपशुषु परस्परं प्रबलः प्राणी दुर्बलं न पीडितवान् ।

व्याख्या:- गोप्तरि = रक्षके, तस्मिन् = राजनि दिलीपेन, वनं = विपिनम्, गाहमाने = प्रविशति सति, वृष्ट्या विनापि = वर्षणमन्तरापि, स्वयमेव दवाग्निः = वनानलः शशाम = शान्तः, फलपुष्पवृद्धिः फलकुसुमसमृद्धिः, विशेषा = अतिशयिता, आसीत् = बभूव / किञ्च सत्त्वेषु = जन्तुषु मध्ये, अधिकः = प्रबलो बलवान् वा सिंहादिः, ऊनं = दुर्बलं मृगादिकम्, न बबाधे = नैव पीडयामास

Renu Devi
09/08/20

सच्चा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।